IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# काव्यप्रकाशगतमुद्धरणम् - एकमध्ययनम् ।

नीलाम्बरबाघः, (सहायकाचार्य:)
साहित्यविभागः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः
श्रीविहारः, पुरी

काव्यजगति "काव्यप्रकाश:" इति लक्षणग्रन्थ : शोभते तराम् । अस्मिन् वहु आलङ्कारिकाणां, दार्शनिकानां नामानि, ग्रन्थानां नामानि एवं वहुनां ग्रन्थानामंशाः आवश्यकस्थले उद्दताः सन्ति । ते निम्नलिखितरूपेण प्रस्तूयन्ते ।

१.१० तमसूत्रवृत्तौ "गौः शुक्लश्चलो डित्थः"[१] इत्यादौ चतुष्टयीशब्दानां प्रवृत्तिः इति। पुनश्च दशमसूत्रवृत्तौ "न हि गौः स्वरूपेण गौनाप्यगौगोत्वाभिसम्वद्धात् गौ"[२] इति। पुनश्च ३२ तमसूत्रवृत्तौ "संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता"[३] इत्यादि।

२.१६ तमसूत्रे लक्षणाप्रकरणे "अभिधेयाविनाभूत"[४] इत्यादि तथा २७ तमसूत्रे नेयार्थदोषनिरूपणे "निरूढा लक्षणा काचित्"[५] इत्यादि कथनम् ।

३.४३ सूत्रवृत्तौ भट्टलोल्लटः, श्रीशङ्कुकः, भट्टनायकः तथा अभिनवगुप्तपादानां मतानि सनाम उल्लिखितानि ।

४.६७तमश्लोके "व्यज्यन्ते वस्तुमात्रेण"[६] ६८ तमश्लोके "सगुणीभूतव्यङ्ग्यै:"[७] तथा ८२तमश्लोके " अनौचित्याद्ऋते नान्यद्"[८] इत्यादि श्लोका: ।

५.६८ तमसूत्रवृत्तौ व्यञ्जनानिरूपणावसरे "श्रुतिलिङ्गवाक्य......."[९] इत्यादि सूत्राणि अंशत: उदाहृतानि ।

६.७० तमसूत्रवृत्तौ "रूपकादि अलङ्कारै:" इत्यादि श्लोकत्रयं, २०३ तमसूत्रवृत्तौ "सैषा सर्वत्र वक्रोक्तिः"[१०] इति श्लोकः उदाहृतोऽस्ति ।

७.७१ तमसूत्रवृत्तौ "आशिषि नाथ:"[११] इति उद्धरणम् ।

८. ग्रन्थस्य ७२तमश्लोके समागत: "दैवतानि पुंसि वा"[१२] इति अंशः ।

९.८२ तमसूत्रवृत्तौ "यथा कर्पूरमञ्जर्य्यां" इति कथनपूर्वकं "कर्पूरमञ्जरी" इति पुस्तकस्य नामोल्लेख : वर्त्तते । अन्यत्र च तस्मात् श्लोकत्रयम् उदाहरणरूपेण दर्शितम् ।

१०. ८९,९६,१११ इत्यादि सूत्रवृत्तौ गुणप्रकरणे वामनस्य मतानि कर्त्तितानि एवं विविधस्थानेषु वामनेन उदाहृताः दशश्लोकाः काव्यप्रकाशे उदाहृताः।

११.१२० तमसूत्रवृत्तौ तथाह्युक्तं रुद्रटेन स्फुटमलङ्कारावेताः इति श्लोकः उद्दतः एवं तस्य काव्यालङ्कारात् २४ श्लोका विविधेषु स्थानेषु उदाहृता:।

१२.१३८ तमसूत्रवृत्तौ ससन्देहालङ्कारे किन्तु निश्चय गर्भ इव नात्र निश्चय प्रतीयमान इति उपेक्षितो भट्टोद्भट्टेन इति भट्टोद्भट्टस्य नाम्ना सह तस्य मतमुपस्थापितमस्ति।

उदाहरणेषु महाभारत- विष्णुपुराण-कालिदास-भारवि-माघ-भतृहरि-अमरू- आनन्दवर्धन-दण्डी-भल्लट-मयूर-हनुमन्नाटक-भट्टनारायण-भवभूति-गाथासप्तशती-मृच्छकटीक -हरविजय-महावीरचरित-रत्नावली-उद्भट-कुट्टिनीमत-भट्टेन्दुराजप्रभृतिनां श्लोकाः उदाहृता: सन्ति ।

**पादटिप्पणी -**

१. महाभाष्यम् ।
२. वाक्यपदीयम् ।
३. तत्रैव ।
४. तन्त्रवार्त्तिकम् ।
५. तत्रैव ।
६. ध्वन्यालोक :।
७. तत्रैव ।
८. तत्रैव ।
९. जैमिनिसूत्रम् ।
१०. भामहः ।
११. कात्यायनवार्त्तिकम् ।
१२. अमरकोषः ।